# पञ्चमप्रकरणम्

# शुद्धाद्वैतसम्प्रदाये कर्मकाण्डस्य मीमांसा

1. शुद्धाद्वैतसम्प्रदाये कर्मकाण्डस्य प्रकाराः।

2. शुद्धाद्वैतसम्प्रदाये कर्मकाण्डस्य वर्तमानस्वरूपम् ।

3. कर्मकाण्डविषयिकी विविधसम्प्रदायेषु एकरूपता।

# 1.शुद्धाद्वैतसम्प्रदाये कर्मकाण्डस्य प्रकाराः

वैष्णवसम्प्रदाये चतुर्णाम सम्प्रदायानां स्वीक्रियते। यथा –

1. रामानुजासम्प्रदायः।
2. मध्वसम्प्रदायः
3. निम्बार्कसम्प्रदायः
4. वल्लभसम्प्रदायः

अत्र अहं वैष्णवान्तर्गत वल्लभसम्प्रदायस्य दृष्ट्या शुद्धाद्वैत–सम्प्रदाये कर्मकाण्डस्य प्रकाराः उपस्थापिताः। अत्र कर्मकाण्डस्य प्रकारद्वयं प्राप्यते। यथा –

1. वेदोक्तकर्माणि ।
2. आचार्योक्तकर्माणि।

**1.वेदाक्तकर्माणि :–**

अस्मिन् सम्प्रदाये वेदोक्त कर्मसु जन्मतः मृत्युपर्यन्तं ये संस्काराः भवितुमर्हति ते सर्वे अस्मिन् सम्प्रदाये स्वीकुर्वन्ति। तथैव विष्णुसम्बन्धी देवानां तदवताराणां च जयन्तीविषये वेदविहितकर्मणि स्वीक्रियन्ते। एवं प्रकारेण यज्ञादि विषयेऽपि वेदोक्तयज्ञानां यथा पुरुषोत्तमयाज्ञाः, विष्णुयागः, वाराह–वामन–नृसिंहदीनां सम्बन्धीयागाः अपि स्वीक्रियते। अत्र वेदोक्तरीत्या कर्मकाण्डं स्वीक्रियते।

**2.आचार्योक्तकर्मणि :–**

कर्मसु विविधनां व्रतानां विविधजयन्तीनां विविधोत्सवानां च मध्ये देवादीनां पूजने–अर्चने यज्ञं च भवति। प्रतियज्ञेषु पुण्यावहनं, नान्दीश्राद्धम, तथा च ग्रहस्थापनं, ग्रहहोमादिकमपि भवति।

प्राणप्रतिष्ठा :–

प्राणप्रतिष्ठाविषये शुद्धाद्वैतसम्प्रदाये वेदाक्तकर्मस्वीकृत्य ततः परं आचार्यनिर्दिष्टानि नियमानि स्वीक्रियते।

**नक्षत्रजननशान्तिः —**

ज्येष्ठाशान्तिः, आश्लेषाशान्तिः, मूलशान्तिः, व्यतीपातशान्तिः, सूर्यादीनांनवग्रहाणां शान्तिः इत्यादि अपि अस्मिन् सम्प्रदाये भवति।

**विष्णुपूजनम् :—**

विष्णुपूजनमपि अस्मिन् सम्प्रदाये कृष्णस्वरूपमपि स्वीक्रियते। तत्र नृसिंहपूजनं, वामनपूजनं, वराहपूजनं, श्रीकृष्णजन्माष्टमी तथा षष्ठी, ज्येष्ठकानि अभिषेकः, अधिमासविषयकं दानादिक्रम, सूर्यचन्द्र—ग्रहणादि विषये सेवाक्रमः, दानसंकल्पः, पवित्रा एकादशी, सरस्वतीपूजनं, सरस्वतीस्थापनं तथा च आचार्यवंशे येषां जन्मतिथि भवति तत्र मार्कण्डेयपूजनादिकमपि शास्त्रदृष्ट्या कुर्वन्ति।

**शुद्धाद्वैतसम्प्रदाये कर्मकाण्डस्य प्रकाराः —**

शुद्धाद्वैतसम्प्रदायस्य श्रीवल्लभाचार्यमहाभागः उद्भावकः वर्तते । पुष्टिमार्गस्य च प्रतिष्ठापकः अस्ति। अस्य प्रादुर्भावः पञ्चदश—शताब्द्यामभवत्। यथा शंकराचार्येण उपनिषद—ब्रह्मसूत्र—भगवद्गीतादीनां भाष्यं व्यरचयत् तथैव वल्लभाचार्येणापि भाष्यं व्यरचयत। सर्वैः आचार्यैः प्रस्थानत्रय्याः भाष्यं रचितं परन्तु वल्लभाचार्यमहाभागेन प्रस्थानचतुष्टयं स्वीकृतम्। श्रीमद्भागवतचतुर्थप्रस्थानं स्वीकृतम्।

भगवत्सेवापरायणः महान् विद्वान पुष्टिमार्गोद्भावकः वल्लभाचार्यः जगतप्रसिद्धो आचार्यः वर्तते। अनेन अनेकानि पुस्तकानि रचितानि स्वाश्रितानां जनानां कृते विशिष्टा पूजा—प्रणाली, सिद्धान्ताः नियमाश्च निर्धारिताः।

सम्प्रति शुद्धाद्वैतसम्प्रदाये विविधपूजाप्रणाली प्राचलत। अस्यां पद्धत्यां भगवत्सेवोपयोगी पूजनक्रमः कीदृशः वर्तते इत्यस्य अत्र यथाक्रमं उपस्थाप्यते ——

धर्मशास्त्रानुसारेण विविधोत्सवानां जयंतीनां कः निर्णयः कथं च तस्य पूजनं क्रियते, एतेषां क्रमः अयमस्ति सम्प्रति द्वादशमासेषु ये उत्सवाः भवन्ति तेषां पद्धतिः इयमस्ति। प्रथमेहि जन्माष्टमीपूजनं व्रतं च, ज्येष्ठाभिषेकः, अधिकमासं विधिनिषेधः, सरस्वतीपूजनं, मार्कण्डेयपूजन –विधिः, सूर्यचन्द्रयोः ग्रहणावसरे स्वीकृत क्रिया पद्धतिः, षष्ठीपूजनविधिः, पुष्टिमार्गीय स्थापनं प्रकारश्चेति क्रमः स्वीकृतः।

**जन्माष्टमीपूजनक्रमः ––**

भाद्रपदकृष्णपक्षे कृष्णजन्मोत्सवे अस्मिन् सम्प्रदाये षष्ठीपूजनं द्वितीयदिवसे भवति। अस्यां पद्धत्यां षष्ठीपूजनं भगवतः कृष्णस्य बालस्वरूपस्य अभिनयजातस्य अन्युदयार्थं षष्ठीदेव्याः आवाहनं पूजनादिकं भवति। तत्र प्रथमं -

**षष्ठीपूजनविधिः ––**

गणपतिपूजनं कृत्वा षष्ठीदेव्याः पूजनं क्रियते। तद्यथा –

षष्ठीदेव्यैः नमः आसनार्थे अक्षतान् समर्पयामि।

षष्ठीदेव्यैः नमः पादयोः पाद्यं समर्पयामि।

षष्ठीदेव्यैः नमः हस्तयोः अर्घ्यं समर्पयामि।

षष्ठीदेव्यैः नमः आध्यान्ते आचमनीयं समर्पयामि।[1]

षष्ठीदेव्यैः नमः स्नानं समर्पयामि।

षष्ठीदेव्यैः नमः वस्त्रं समर्पयामि।

षष्ठीदेव्यैः नमः गन्धं समर्पयामि।

षष्ठीदेव्यैः नमः अक्षतान् समर्पयामि।

षष्ठीदेव्यैः नमः पुष्पाणि पुष्पमालां च समर्पयामि।

षष्ठीदेव्यैः नमः सौभाग्यपरिमलद्रव्यं श्वेतचूर्णं रक्तचूर्णं च समर्पयामि।

षष्ठीदेव्यैः नमः धूपं समर्पयामि।

षष्ठीदेव्यैः नमः  दीपं समर्पयामि।

षष्ठीदेव्यैः नमः  नैवेद्यं समर्पयामि।

**ततः परं वसोर्धारा क्रियते –**

ॐ वसोः पवित्रमसि शतधार वसोः पवित्रमसि सहस्रधारम्।
देवस्य त्वा सविता पुनात्वच्छिद्रेण पवित्रेण सुप्वाकामधुक्षः।।

ततः परं खड्गपूजनं क्रियते। यथा –

असिर्विशसनः खड्गः शत्रूणां प्राणहारकः।
तीक्ष्णधाराय शुद्धाय तस्मै खड्गाय ते नमः।।[2]

खड्गाय नमः। सकलोपचारार्थे गन्धाक्षतपुष्पैः सम्पूजयामि।

ततः परं मुरल्यां पूजनं क्रियते –

पुण्यस्त्वं सर्वतीर्थानां मंगलानां च मंगलम्।
विष्णुना विधृतोऽसि त्वमतः शान्तिं प्रयच्छ मे।।

मुरल्यैः नमः। सकलोपचारार्थे गन्धाक्षतपुष्पैः सम्पूजयामि।

मथान मन्दरोऽसि त्वं मथितः सागरस्त्वया।
अतो ममापि पुत्रस्य मथ विघ्नं नमोऽस्तु ते।।

मन्थानाय नमः। सकलोपचारार्थे गन्धाक्षतपुष्पैः सम्पूजयामि।

षष्ठीदेव्यैनमः। बलीं समर्पयाामि । बलिद्रव्यायनमः। सकलोपचारार्थे गन्धाक्षत–

पुष्पैः सम्पूजयामि।

**प्रार्थना :–**

जय दोवि  जगन्मातर्जगदानन्दकर्मणि।
प्रसीद मम कल्याणि नमस्ते देवि षष्ठके।।

षष्ठिदेवि महासत्वे सर्वेषां च सुतप्रदे।
वरदे त्वत्प्रसादेन चिरं जीचतु बालकः।।

गौरीपुत्रो यथा स्कन्दः शिशुत्वे रक्षितस्त्वया।
तथा ममाप्यं बालः रक्ष्यतां षष्ठिके नमः।।

षष्ठिदेवि नमस्तुभ्यं सूतिकागृहशायिनि।
पूजिताऽसि परं भक्त्या सबालां रक्ष मातरम्।।

शयनी सर्वभूतानां वर्द्धिनी धनसम्पदाम्।
बोधिनी सर्वविद्यानां जन्मदे त्वां नता वयम्।।

जननी सर्वलोकानां बालानां च विशेषतः।
नारायणस्वरूपेण सुतं रक्ष सर्वदा।।

शक्तिस्त्वं सर्वदेवानां बालानां हितकारिणी।
मातेव रक्ष मे पुत्रं महाषष्ठि नमोऽस्तु ते।।

रुद्राणि रुद्ररूपेण सर्वविघ्नविनाशिनि।
प्राणदे वरदे देवि रक्ष बालं शुभा भव।।

अमुं मम कुलोत्पन्नं रक्ष त्वमिह बालकम्।
रक्षोभूतपिशाचेभ्यः शाकिनी डाकिनीषु च।।

मातेव रक्ष मे बालं श्वादेषु नगरेषु च।
रुद्रशक्तिः समाख्याता महाषष्ठि नमोऽस्तुते।।
धात्रीं त्वं कार्तिकेयस्य महाषष्ठीति विश्रुता।
त्वत्प्रसादादविघ्नेन चिरं जीवतु बालकः।।[3]

**ज्येष्ठाभिषेकः –**

सम्प्रदायेऽसिमन् ज्येष्ठाशुक्लपूर्णिमायां अथवा तस्य समीपे दिवसेषु यदा आकाशे ताराग्रहः दृश्यते सूर्योदय पूर्वं भगवतः कृष्णस्य ज्येष्ठाभिषेकः क्रियते। यथा ––

श्री कृष्णाय नमः। श्री गोपीजनवल्लभाय नमः। ''हरिः ऊँ तच्छं योरावृणीमहे। गातुं यज्ञाय। मातुं यज्ञपतये। दैवी स्वस्तिरस्तु नः। स्वस्तिर्मानुषेभ्यः। ऊर्ध्वं जिगातुभेषजम्। शन्नो अस्तु द्विपदे। शञ्चतुष्पदे।''[4] ऊँ शान्तिः शान्तिः।

सुवर्णं धर्मं परिवेद वेनम्। इन्द्रस्यात्मानं दशधा चरन्तम्। अन्तस्समुद्रे मनसा चरन्तम्। ब्रह्माऽन्वविन्दद्द शहोतारमर्णे। अन्तः प्रविष्टश्शास्ता जनानाम्। एकस्स्न्बहुधा विचारः। शतं ँ् शुक्राणि यत्रैकं भवन्ति। सर्वे वेदा यत्रैकं भवन्ति। सर्वे होतारो यत्रैकं भवन्ति। स मानसीन आत्मा जनानाम्। अन्तः प्रविष्टःशास्ता जनानां ँ् सर्वात्मा। सर्वाः प्रजा यत्रैकं भवन्ति। चतुर्होतारो यत्र सम्पदं गचछन्ति देवैः। स मानसीन आत्मा जनानाम्।। ब्रह्मेन्द्रमग्निं जगतः प्रतिष्ठाम्। दिवआत्मान ँ्सवितारं बृहस्पतिम्। चतुर्होतारं प्रदिशोऽनुक्लृप्तम्। वाचो वीर्यं तपसाऽन्वविन्दत्। अन्तः प्रविष्टं कर्तारमेतम्। त्वष्टार ँ्रूपणि विकुर्वन्तं विपश्चिम्।। एवं आहत्य चत्वारिंशत मंत्राः पठ्यन्ते। ततः परं मार्जनमंत्राणां अपि पाठः भवति।[5]

**सरस्वतीपूजनपद्धतिः ––**

सर्वेषां वैष्णवानां गृहे अश्विनमासस्य शुक्लपक्षस्य मूलनक्षत्रे सरस्वतीपूजनं स्थापनं भवति। वल्लभाचार्यमहाभागेन स्वनिर्णयानुसारेण लिखितं यत् ––

'मूलेन आवाह्येतदेवी श्रवणे च विसर्जयेत।' अत्र वैदमन्त्रैः भगवत्याः पूजनं भवति। प्रथमे दिवसे आवहनं स्थापनं क्रियते, द्वितीयदिवसे पूजनं भवति, तृतीयदिवसे विसर्जनं भवति। तद्यथा ––

**श्रीकृष्णाय नमः।। अथ सरस्वतीस्थापनप्रकारः।। नत्वा श्री वल्लभाचार्यान् तत्प्रदर्शितमार्गतः।। सरस्वती स्थापनीयप्रकारोऽयं विविच्यते।** तत्र तावद् वैष्णवानां सरस्वतीस्थापनं कर्तव्यं तत्तु श्रीपुरुषोत्तमैः सरस्वतीस्थापन –वादे प्रतिपादितमेवास्तीति नस्माभिः प्रप×च्यते। किन्तु समयप्रकारावुच्येते। तत्र निर्णयंसिंधौ देवीपुराणे।।

**मूलेषु स्थापनं देव्याः पूर्वाषाढासु पूजनम्। उत्तरासु बलिं दद्याच्छ्रवणेन विसर्जयेत।।1।।**[6] **रूद्रयामलेऽपि। मूलऋक्षे सुराधीश पूजनीया सरस्वती। पूजयेत्प्रत्यहं देव यावद्वैष्णवमृक्षकम्। नाध्यापयेनन च लिखेन्नधीयीत कदाचन। पुस्तक स्थापिते देव विद्याकामो द्विजोत्तमः।।2।।** निर्णयामृते।। **मूलेनगमनं देव्याः पूर्वाषाढ़ासु पूजनम्। उत्तरासु बलिं दद्याच्छ्रवणे चापराजिता।।11।। इति पाठः।** क्वचित्तु।। **मूलेनवाहयेद्देव° श्रवणेन विसर्जयेत।** इत्यपि।। भगवद् भास्करे समयमयूखे संग्रहेऽपि।। **अश्विनस्य सिते पक्षे मेधाकामः सरस्वतीम्।। मूलेनवाह्ष्देव° श्रवणेन विसर्जयेत। ।।** अत्र 'नक्षत्रे च लुपी' इति सूत्रोणाधिकरणे तृतीया।। तेन मूलयुक्तकाले श्रवणयुक्तकाले इत्यर्थः।। अत्र प्रथमत्यागे मानाभावान्मूलाद्यपादे आवाहनं, श्रवणाद्यपादे विसर्जनमिति निर्णयसिन्धुः।। एतच्चाद्यपादस्य मध्याहनात् प्रागलाभे सरस्वत्या देवीतवेन तत् पूजनरूपदेवकार्यस्य पूर्वाह्णे एव कर्तव्यत्वात्।। **आदिपादो निशायां तु श्रवणस्य यदा भवेत्।। संप्रेषणं तदा देव्या दशम्यां च महोत्सवः।।** इति निर्णयसिन्धुधृतब्रह्माण्डवाचनाच्च।। अत्र चकारः समुच्चयार्थकः।। संप्रेषणं विसर्जनम्। अत्र नक्षत्रक्षये दिनत्रयं पूजनम्। वृद्धौ तु पञ्चदिनमपि।। यदा उदये ज्येष्ठा स्वल्पा पूर्वाह्णे मूलपद्यपादः।। तदपि पंचदिनम् यदा च पूर्वदिने मध्याह्नपर्यन्तं ज्येष्ठा, मूलाद्यपादश्चापराह्णे द्वितीयेऽह्निह्रासवशात् स्वल्पं मूलर्क्षं तदा **सा तिथिस्तच्च नक्षत्रं यस्यामभ्युदितो रविरिति** वचनात् द्वितीयेऽह्नि मूलान्तपादे पूजनम्।। मूले

स्वल्पे पूर्वाषाढ़ाद्यपादे स्थापनम्।। नत्वाद्यपादाग्रहः कार्य इति संक्षेपः।। एवमेव विसर्जनेपि ज्ञेयः।। श्रवणे स्वल्पे धनिष्ठाद्यपादे विसर्जनम्।।

**मार्कण्डेयपूजनविधिः —**

शुद्धाद्वैत सम्प्रदाये जन्मदिवसे प्रतिवर्षं (यस्य कस्यापि जन्मः भवति) मार्कण्डेयपूजनं भवति। वल्लभकुले सर्वेषां वल्लभवंशजातकानां मार्कण्डेयपूजनपद्धतिः अनुसारेण जन्मोत्सवः मन्यते। यथा ——

आचमनम् – केशवाय नमः, नारायणाय नमः, माधवाय नमः, गोविन्दाय नमः इति हस्तं प्रक्षाल्य,

ॐ भद्रंकर्णेभिः श्रुणयान देवाः भद्रं पश्येमाक्षभिर्यन्नाः। स्थिरैरैं रस्तुष्टुवा ँ्सस्तनूभिः व्यशेमहि देवहितं यदायुः। स्वस्तिन इन्द्रो वृद्धश्रवाः स्वस्तिनः पूषा विश्ववेदाः। स्वस्तिनस्ताक्ष्र्यो अरिष्टनेमिः स्वस्तिनो बृहस्पतिर्दधातु।।ॐ शान्तिः शान्तिः शान्तिः।

समुखश्चैकदन्तश्च कपिलो गजकर्णकः।
लम्बोदरश्च विकटो विघ्ननाशो विनायकः।।

धूम्रकेतुः गणाध्यक्षो भालचन्द्रो गजाननः।
द्वादशैतानि नामानि यः पठेच्छ्रणुयादपि।।

विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा।
संग्रामे संकटे चैव विघ्नतस्य न जायते।।

शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजम्।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये।।

अभीप्सितार्थसिद्धयर्थं पूजितो यः सुरासुरैः।
सर्वविघ्नच्छिदे तस्मै गणाधिपतये नमः।।

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे।
यं नत्वा कृतकृत्यास्युस्तं नमामि गजाननम्।।[7]

प्राणानम्य। हस्ते साक्षातोदकं गृहीत्वा। संकल्पं कुर्यात् – विष्णुः विष्णुः विष्णुः श्रीमद् भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य अद्य ब्राह्मणे द्वितीये परार्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे कलिप्रथमचरणे भूर्लोके भारतवर्षे जम्बूद्वीपे आर्यावर्तान्तरगतब्रह्मावर्तैकदेशे – – – संवत्सरे – – – अयने – – – ऋतौ – – – मासे – – – पक्षे – – – तिथौ – – – वासरे – – नक्षत्रे – – – योगे – – – करणे – – – राशिस्थितेर्सूर्ये – – – राशिस्थिते देवगुरौ एवं ग्रह्रण विशेषण विशिष्टायां शुभपुण्यतिथौ मम आयुः आरोग्यैश्वर्याभिवृद्धयर्थं मार्कण्डेयाद्यष्टचिरंजीविना पूजनंप्रतिष्ठावाहनानि करिष्ये।

तत्रादौ निर्विघ्नतासिद्धयर्थं गणपतिपूजन करिष्ये।

हस्ते अक्षतान्गृहीत्वा –

ऊँ गणानात्वा गणपति ँ्हवामहे कविं कवीनामुपश्रवस्तमम् ज्येष्ठराजं ब्रह्मणस्पत आनः श्रृण्वन्नूतिभिः सीदसादनम्।। गणपतये नमः आवाहयामि, गणपतये नमः आसनं समर्पयामि, गणपतये नमः पाद्यं समर्पयामि, गणपतये नमः हस्तयोः अर्घ्यं समर्पयामि, अर्घ्यान्ते आचमनीयं समर्पयामि, स्नानं समर्पयामि, अक्षतान् समर्पयामि, पुष्पाणि समर्पयामि, दूर्वां समर्पयामि, सौभाग्यपरिमलद्रव्यं समर्पयामि। धूपंदीपं नैवेद्यं– समर्पयामि, ताम्बूलं–दक्षिणां च समर्पयामि। हस्ते जलमादाय अनया पूजया गणेशः प्रीयताम्। हस्ते अक्षतान् गृहीत्वा –

ॐ तदस्तु मित्रावरुणा तदग्नेशंयोरस्मभ्यदिमस्तुशस्तम्। अशीमहिगाधमुत प्रतिष्ठां नमो दिवे बृहते सादनाय। गुहा वै प्रतिष्ठासूक्तं तत्प्रतिष्ठाततमया वाचा शंस्तव्यं तस्माद्यापि दूर इव पशूंल्लभते गृहानेवैनाना जिगमिषति गुहा हि पशूनां प्रतिष्ठा प्रतिष्ठा। मार्कण्डेयाद्यष्ट –चिरंजीविनः इहागच्छत इह तिष्ठत सुप्रतिष्ठिता वरदा भवत। इत्यक्षतपुज्जेषु मार्कण्डेयादीनाबाह्य मार्कण्डेय नमः। अश्वात्थात्मने नमः। बलये नमः। व्यासाय नमः। हनुमते नमः। विभीषणाय नमः। कृपाय नमः। परशुरामाय नमः। मार्कण्डेयाद्यष्टचिरजीविभ्यो नमः आवाहनं समर्पयामि। मार्कण्डेयाद्यष्टचिरजीविभ्यो नमः। पाद्यार्ध्याचमीचनीयं –स्नानं–अंबर–गंध–अक्षत–पुष्प–दूर्वा–पुष्पमाला–धूप–दीप–नैवेद्य–दक्षिणा आदि तथा लब्धोपचारान् समर्पयामि।

**प्रार्थना –**

अश्वत्थामाबलिर्व्यासो हनुमांश्च विभीषणः।
कृपः परशुरामश्च सप्तैते चिरजीविनः।।
मार्कण्डेयमहाबाहो सप्तकल्पान्तजीवन।
चिरंजीवी यथा तवं हि भविष्यामि तथा मुने।।

नववर्षायुषं प्राप्य तपसा महता पुरा।
सप्तकल्पान्तकं त्वायुः प्राप्तं हि मुनिना त्वया।
आयुर्देहि यशोदेहि श्रियं देहि धनं तथा।
पुत्रपौत्रपौत्रांश्च मार्कण्डेय महामुने।।

द्रोणपुत्र महाभाग चन्द्रतेजसमुद्भव।
भवायुर्वरदो मे त्वमश्वत्थाम्ने नमोस्तुते।।

दैत्येन्द्रकुलसम्भूत बलदातर्हरेः पुरा।
प्रपन्नं शरणं त्वां हि दीर्घमायुः प्रयच्छ मे।।

भविष्यत्सांप्रतं चैव अतीवज्ञानवान् मुने।
नारायण समुदभूत त्वं व्यासायुः प्रदो भव।।

अंजनीगर्भसम्भूत कपीन्द्र सचिवोत्तम।
रामप्रिय नमस्तुभ्यं हनुमत रक्ष सर्वदा।।

विभीषण नमस्तुभ्यं हनुमत रक्ष सर्वदा।
आयुरारोग्यमैश्वर्य देहि पौलस्तयनन्दन।।

द्विजेन्द्र भरताचार्य सर्वशास्त्रविशारद।
शरण्यं त्वां प्रपन्नोऽस्मि कृपायुश्च कृपां कुरु।।

रेणुकेय महावीर्यं क्षत्रियान्वयनाशन।
आयुः प्रयच्छ मे ब्रह्मन जामदग्न्य नमोस्तुते।।

मार्कण्डेय महाभाग सप्तकल्पान्तजीवन।
आयुरारोग्यसिद्धयर्थं अस्माकं वरदो भव।।[8]

**मन्त्र :** अर्चत प्रार्चत प्रियमेधासो अर्चत। अर्चन्तु पुत्रका उत पुरं न धृष्णवर्चत श्रिये जातः श्रिय अनिर्याय श्रियं वयो–जरितृभ्यो दधाति। श्रियं वसाना अमृतत्वमायन् भवन्ति सत्या समिथा मितद्रौ एवैनं तच्छ्रियामादधाति संततमृचा वषट्कृत्यं संतत्यै संधीयते प्रजया पशुभिर्य वेद। नर्यं प्रजां मे गोपाय। अमृतत्वया जीवसे। जातां जनिष्यमाणाश्च। अमृतेसत्येप्रतिष्ठिताम्।

अथर्वपितुंमेगोपाय। रसमन्नमिहायुषे। अदब्धायोऽशीततनो। अविशन्नः पितुं कृणु। शं पशून् मे गोपाय। द्विपादो ये चतुष्पदः। अष्टाशफाशश्च य इहाग्ने। ये चैकशफा आशुगाः। तानिन्द्रियवता कुरु। सर्वमायुरूपासताम्।[9]

**सूर्यचन्द्रयोः ग्रहणे सेवाक्रमः —**

दशदिगन्तविजयीविद्वतवरेण्य गो.श्री पुरुषोत्तमजीमहाराजविरचिते उत्सवप्रतान ग्रनथे सूर्यचन्द्रयोः ग्रहणविषये निर्णयः लिखितः, तत्र ग्रहणसमये विविधजपादिक्रमः, सेवाक्रमः ग्रहणमध्ये संकल्पः, ग्रहणसमये दानसंकल्पः, ततः परं ग्रहणोपरान्ते शुद्धिः क्रमश्च वर्णिता ।

पुष्टिमार्गीयसेवायां अनेके कार्यक्रमाः भवन्ति। तत्र वैदिककर्मकाण्ड–दृष्ट्या के ग्राह्याः के अग्राह्याश्च इति सर्वं सम्प्रदायानुसारेण वैष्णवैः क्रियते इति।

**पुरुषोत्तमप्रतिष्ठाप्रकारः[10] —**

श्रीकृष्णाय नमः। श्रीगोपीजनवल्लभाय नमः। श्रीमदाचार्यचरण–कमलेभ्यो नमः। अथ श्रीपुरुषोत्तमप्रतिष्ठाप्रकारः लिख्यते। शुभवारनक्षत्रयोगादियुते दिने स्वरूपं पीठे उत्थितं कत्वा कुशेन **'सहस्रशीर्षे'** इत्यारभ्य **'सर्वमनिषाण'** इत्यन्तेन प्रोक्ष्य स्नानपात्रे स्थापयित्वा श्रीमदाचार्यचरणान्ध्यायात् महामन्त्रेण (पंचाक्षरमंत्रेण) दुग्धादिषु तुलसीदलं चन्दनं च निक्षिप्य तमेव पठन् तेन पूर्वं स्नानं कारयेत्। ततः शङ्खं एव निक्षिप्य प्यसा घृतेन शर्करया मधुना च क्रमेण स्नापयेत्। पुनः (शीतलेन) शुद्धोदकेन च स्नापयेत। अँवस्त्रं कृत्वा पट्टवस्त्रमुत्तार्य स्नानपात्रे अँवस्त्रमास्तीर्य तत्र स्थापयेत। ततः पुष्पतैलमालिप्य पाटीरचूर्णेनोद्धर्तनं कृत्वा तप्तोदकेन स्नापयेत्। तत्श्चन्दनमालिप्य स्नानं कारयेत्। ततो·›वस्त्रं कृत्वा श्याममूर्त्तौ पुष्पतैलागुरुसारावालिप्याऽन्यत्रैतदकृत्वा कुलहीकण्ठ– वस्त्रादीनि समर्प्य यथाशक्त्या आभरणानि समर्पयेत्। श्यामे

नेत्रालङ्कारोऽन्यत्राञ्जुन गुजमालां मयूरचन्द्रिकां प्रसूनमालां च समर्पयेत्। वस्त्राणामुपर्यगरुसारं समर्पयेत्। रागं च मृगमदं पिष्ट्वा तन्मध्ये –

यत्किंचित्कर्पूरचन्दने प्रक्षिप्य कपोले मण्डयेत्। ततश्चन्दनयुते तुलसीदले उभयोश्चरणयोः स्थापयित्वा पुनः श्रीमदाचार्यचरणसरसीरुह –ध्यानं कुर्यात्।

**चिन्तासन्तानहन्तारो यात्पादाम्बुजरेणवः।**
**स्वयीनां तन्निजाचार्यान् प्रणमामि मुहुर्मुहुः ।।**
**(इति ध्यानम्)**

ततः श्रीकृष्णत्मकं प×चाक्षरं महावाक्यं (कृष्ण तवास्मि)

स्वरूपहृदयं स्पृष्ट्वा त्रिवारं पठेत्। ततो **'जय जय जह्यजामजिते'** इति श्लोकं पठेत् –**जय जय जह्यजामजितदोषगृभीतगुणां**
**त्वमसि यदात्मना समवरुद्धसमस्तभगः ।**
**अगजगदोकसामखिलशक्त्यवबोधकते**
**क्वचिदजयातमना च चरतोऽनुचरेन्निगमः।।**[11]

तत 'स्तमद्भुतं' महार्हवैडूर्यकिरीटकुण्डलत्विषा'

'नन्दस्त्वात्मजउत्पन्ने' 'नव' कुंकुमकिञ्जल्कम्'

'देवकीजठरभूरुड्डराज' इत्यादिषु यत् स्वरूपं निरूपितं तत्स्वरूपमेव एतानि पद्यानि पठन् ध्यायेत् –

**तमद्भुतं बालकमम्बुजेक्षणं चतुर्भुजं**
**शङ्खगदाद्युदायुधम्।**
**श्रीवत्सलक्ष्मं गलशाकभिकौस्तुभं**
**पीताम्बरं सान्द्रपयोदसौभगम्।।** [12]
**महार्हवैडर्यकिरीटकुण्डत्विषा परिष्वक्तसहस्रकुन्तलम्।**
**उद्दामकाञ्च्यैंदकङ्गणादिभिर्विरोचमानं**

**सान्द्रपयोदसैभगम्।।** [13]

**नन्दस्त्वात्मज उत्पन्ने जाताह्लादो महामनाः।**

**आहूय विप्रान् वेदज्ञान् स्नातः शुचिरलङ्कृतः।।** [14]

**नवकंकुमकिञ्जल्कमुखपङ्कजभूतयः।**

**बलिभिस्वरितं जग्मुः पृथुः श्रोण्यश्चलत्कुचाः।।**[15]

**वत्सलो व्रजगवां यदग्रधो, वन्द्यमानचरणः पथि वृद्धैः।**

**कृत्स्नोधनमुपोह्य दिनान्त, गीतवेणुरनुगेडित कीर्तिः।।**[16]

ततः सुवर्णमये वेणुवेत्रे पट्टमये पीताम्बरे च समर्पयेत्। ततः पुरुषोत्तमात्मकतायां जातायां स्वरूपे भगवान् श्रीगोकुलेशः श्रीकृष्णोऽयमितिबुद्धिः कर्तव्या, न स्वरूपादिबुद्धिः ।

ततः **'स्तद्दर्शनाह्लादे तिश्लोकं** पठन् सिंहासनं स्पृष्ट्वा **'रसो वै सः'। रस ँ्ह्येवायं लब्ध्वाऽऽनन्दी भवती'** ति ऋचं **'तत्रोपविष्ट'** इति श्लोकं च पठन् श्रीकृष्णपदार्थनिरूप्योऽयमेवेति ध्यायन् श्रीकृष्णं सिंहासने स्थापयेत्।

**तद्दर्शनाह्लादविधूतहृयद्रुजो मनोरथान्तं**

**श्रुतयो यथा ययुः।**

**स्वरुत्तरीयः कुचकुङ्कुमारितरचीक्लृपन्नासनमात्मबन्धवे।।**[17]

**रसो वै सः। रस ँ्ह्येवायलब्ध्वाऽऽनन्दी भवति।** [18]

**तत्रोपविष्टो भगवान् स ईश्वरो**

**योगश्वेरान्तहृदि कल्पितासनः।**

**चकास गोपीपरिषद्गतोऽर्चितस्त्रैलाक्य**

**लक्ष्म्येकपदं वपुर्दधात्।।** [19]

ततश्चरणारविन्दाभ्यां तुलसीमुत्तार्य स्वयं गृहणीयात्। पुनः तुलसीदलं च समर्पयेत्। धूपदीपौ कृत्वा बालभोगादिराजभोग–पर्यन्तमुत्सवभोगं च समर्पयेत्। ततः समयानन्तरमाचमनं मुखवस्त्रादि कृत्वा

वीटिकां वेणुवेत्रे चूर्णमयमारतिकं कृत्वा **'नमो नमस्ते'** इति श्लोकेन नत्वानवसरं विदध्यात्।

**नमो नमस्तेऽसत्वृषभायसात्वतां**
**विदूरकाष्ठाय मुहुः कुयोगनिनाम्।**
**निरस्तसाम्यातिशयेन राधसा स्वधामानि**
**ब्रह्मणि रंस्यते नमः।।** [20]

श्रीमूर्त्तेप्येवमेव भगवता सह वा। एवं करणे साक्षात्पुरुषोत्तमात्मकता सिद्धया प्रादुर्भावादि स्तुतं तं प्रति तत्तद्भावानुसारेणैव , एत एव

**तारतम्यं न स्वरूपे देहे वा तत् क्रियासु च।**
**तथापि यावता कार्यं तावत्तस्य करोति हि।। इति** [21]

पितृचरणैः (भक्तिवर्द्धिन्याम्) निरूपितम्। ततोऽन्याश्रयत्यागपूर्वकं गुरुपदिष्ट– श्रीभागवतभक्तिवर्द्धिनीनवरत्नप्रकारेण स एव भगवान् श्रीकृष्णो भजनीयः अत्रोपपत्तिर्भक्तिहंसे स्फुटीकृतेतीति नात्र प्रप×च्यते।

एवं द्वादशौं भगवन्नामभिः – केश्वाय नमः। नारायणाय नमः।

माधवाय नमः। गोविन्दाय नमः। विष्णवे नमः। मधुसूदनाय नमः। त्रिविक्रमया नमः। वामनाय नमः। हृषीकेशाय नमः। पद्मनाभाय नमः। दामोदराय नमः। न्यास कर्तव्यः। एतानि भगवन्नामानि पाद्योत्तखण्डोक्त –प्रकारेण ध्यायन् न्येसत् –

**ललाटे केशवं ध्यायेन्नारायणमथोदरे।**
**वक्षःस्थले माधवं तु गोविन्दं कण्ठकूपके।।**
**विष्णुं च दक्षिणे कुक्षौ बाहौ च मधुसूदनम्।**
**त्रिविक्रमं कन्धरे तु वामनं वामपार्श्वके।।**
**श्रीधरं वामबाहौ तु हृषीकेशं तु कन्धरे।**
**पृष्ठे तु पद्मनाभं च कट्यां दामोदरं न्यसेत् ।।**

**तत्र प्रथमं –**

ललाटे – केशवाय नमः। नाभिपार्श्वके–नारायणाय नमः। हृदये–माधवाय नमः। कण्ठे– गोविन्दाय नमः। दक्षिणस्तने– विष्णवे नमः। वामनस्तने–मधुसूदनाय नमः। दक्षिणाबाहौ–त्रिविक्रमाय नमः। वामस्कन्धे –हृषीकेशाय नमः। कट्यां– दामोदराय नमः। मूर्ध्नि – पद्मनाभाय नमः।

एवं प्रकारेण स्वास्तिनालिना न्यासः कर्तव्यः। ततो यथोक्तभगवेदाङ्गेषु यथा नामोच्चारणपूर्वकं तत्र – तत्राअंगुलिस्पर्शेन न्येसत् –

चरणयोः स्पर्शे – अजाय नमः। जान्वोः स्पर्शे –अणिमते नमः। उरो स्पर्शे–यााय नमः। कटिस्पर्शे–अच्युताय नमः। उदयस्पर्शे–हयग्रिवाय नमः। हृदये– (हृदयं स्तनयोर्मध्येनिमनस्थानम्) केशवाय नमः। उरसि (स्तनयोर्मध्ये उरस्तूच्चूस्थानम्) ईशाय नमः। कण्ठे–इनाय नमः। भुजयोः – विष्णवे नमः। मुखस्पर्शे –उरुक्रमाय नमः। मस्तके–ईश्वराय नमः।

शुद्धाद्वैतसम्प्रदाये भगवद् पूजनस्य अनेके उपक्रमः सन्ति। पुराणपुरुषस्य विष्णोः अपरनाम् पुरुषोत्तमः इति स्वीकृतम् आचार्यैः।

पुराणपुरुषो विष्णुः पुरुषात्तमः उच्यते। **पुरुष. सह–1**

अस्य पुरुषोत्तमस्य विविधरूपेण पूजनं भवति। अस्मिन् सम्प्रदाये अनेन कारणेन शुद्धाद्वैत सम्प्रदाये पूजनक्रमः कीदृशः इति अस्य उपस्थाप्यते।

श्रीहरिरामहाप्रभुणा यत् समुद्दिष्टं तदत्र लिख्यते।

आचार्येण लिखितं यत् मनसिपूजा सर्वत्र फलरूपेण भवति। अत्र पुष्टिमार्गीय प्रकारः लिखिताः। मनसिपूजायाः प्रकारः त्रयम् वर्तते। फलत्रयममपि भवति। चादृशं वरणं भवति। तादृशं फलमपि भवति। इदं पूजनम् अलौकिकं भवति। पुरुषोत्तमैः सायुज्यं ज्ञायते। वैकुण्ठादिषु सेवायाः शरीरमेव आधिकारम् एवं सूक्ष्मसिद्धान्तसंग्रहे वर्णनं प्राप्यते।

प्रथमेहि आचार्यैमार्गीयगुरुणां शरणं प्राप्यम् ततः भक्तिप्राप्तये लौकिकं वैदिकं व पूजनं स्वीकरणीयम्।

अग्रे आचार्य महोदयेन सेवानियमाः के ? गुरुसेवा कथम् करणीयम् ? का ? का नाम विमुक्ताः ? सेवाविचारः, जपपाठः, नियमाः के ? तिलकमाला कथं भवेत् ? इत्यादीनामुल्लेखः प्राप्यते।

आचार्येण इदमपि निगदितं सर्वेषु कार्येषु समपर्णं कुर्यात्। यथा समर्पणे योग्यं तथा तदेव समर्पयेत।

सर्वाणि कार्याणि गुर्वादेशं पश्चात् कृष्णाय समर्पणं कुर्यादिति। यथा –

अथ स्वकीयबोधाय सूक्ष्मरीत्या विचार्य च।
स्वमार्गीयप्रकारोऽयं सर्वोऽपि हि निरूप्यते।।

गृहीत्वा नामशरणं गत्वां सर्वं समर्प्यं च।
सेवा सार्थकतासिद्धयै देहादीनां तथा पुनः।।

अन्यत्राविनियोगाय क्रियतां तनुवित्तजा।
तथा तु मानसी सिद्धयेत सैवात्र फलरूपिणी।।

सा प्रकारत्रयेणेति तेषां तन्मध्यपाततः।
फलत्वमिति ते प्रोक्ताः सेवायां तु फलत्रयम्।।

सेवा तु सा समानत्वात् सैवान्ते न विचक्षणा।
फलतातः प्रकाराणां पश्चाद्भावितयोच्यते।।

यादृशं वरणं तादृक्प्रकारापन्नसेवना।
मनसी फलरूपेति तारतम्येन चोच्यते।।

ते प्रकारास्तु विज्ञेया ग्रन्थातसेवाफलाभिधात्।
अलौकिकं हि सामर्थ्यं सायुज्यं पुरुषोत्तमे।।

वैकुण्ठादिषु सेवायाः शरीरमधिकारकृत्।
एतावानेव मार्गेऽस्मिन् सूक्ष्मः सिद्धान्तसंग्रहः।।

तत्रादौ शरणं यातः किं कुर्यादिति चोच्यते।
श्रीमदाचार्यमार्गीयगुरुणां शरणं गतः।।

स्वामित्वेन हरिं स्वं तु सेवकत्वेन भावयेत्।
लौकिकं वैदिकं वापि विदध्याद् भक्तिसिद्धये।।

नान्यमार्गाश्रयो नैव देशान्तरसमाश्रयः।
नैव तीर्थाश्रमो नैवाभिमतेः कर्तृताश्रयः।।

नैव मन्त्रसमाधारो न च कर्मादिकाश्रयः।
सर्वदोषनिवृत्यर्थं धर्मत्वेन हरौ दृशिः।।

विवेकदेरभावेन दैन्योनार्थत्वभावनम्।
स्वकामपूरणार्थाय पूर्णानन्दत्ववेदनम्।।

न साधनैर्भवेन्मोक्षो हरिरेव तदात्मकः।
तदीयमायाः संपत्तौ मुक्त्वेनैव चिन्तनम्।।

अत एव निराका›ान मोक्षतः कृष्णसेवकाः।
देशादिसाधनं कृष्णः पुरुषार्थश्चतुर्विधः।।

एवं मनसि सततं चिन्तनीयं प्रयत्नतः।

प्रायश्चित्तादिषु मतिर्न कार्या शरणं व्रजेत्।।

उपस्थितेषु दोषेषु सर्वेष्वथ विशेषतः।
सुशक्येष्वप्यशक्येषु हरेर्गतिमथ स्मरेत्।।

अन्याश्रयो नैव कार्यो नैवान्यत्र स्वता व्रजेत्।
प्रार्थना नैव कुत्रापि कर्तवया भगवत्यपि।।
अविश्वासो न कर्तव्यो ब्रह्मास्त्रस्य निदर्शनात्।
लौकिके वैदिके वापि कार्ये स› विवर्जयेत्।।

यथाकथश्चितकर्तव्ये भारवत्तत्र भावनम्।
सर्वत्र ममतां त्यकत्वा सर्वं कार्यं प्रसाधयेत्।।

लोभं च हृदये नैव कुर्यात्, प्रापतं हि सेवयेत्।
शरणस्यापि ये धर्मास्तत्सिद्धौ शरणं व्रजेत्।।

विवेकधैर्येऽपि सदा श्रीकृष्णाश्रयपोषके।
तद्ग्रन्थेभ्योऽवगतयापि प्रयत्नाद् हृदि भावयेत्।।

एवमाश्रितधर्मोऽयं संक्षेपेण निरुपितः।
आश्रित्य वल्लभाचार्यान् बुद्धवैवं कृष्णामाश्रयेत्।।
अतः परं क्रमणैव जीवः कृतसमर्पणः।
तत्साधनाय सततं किं कुर्यादिति चोच्यते।।

सेवासंस्काररूपत्वाद्विदध्यात् सेवनां सदा।
ब्रह्मसम्बन्धिता जीवदेहसम्बन्धिवस्तुषु।।

सर्वदोषविमुक्तत्वं स्वस्मिन्नपि विभाव्येत्।
सर्वथा सर्वदैवापि न चाद्यादसमर्पितम्।।

तद्भक्षणे भवेदेवाब्रह्मसम्बन्धिवस्तुतः।
सर्वत्र ब्रह्मसम्बन्धभावनाश एव हि।।

लौकिकं वैदिकं वापि कुर्यात् सर्वं समर्पितम्।
अतः सर्वेषु कार्येषु कुर्यादादौ समर्पणम्।।

यथा समर्पणे योग्यं यत्तथा तत्समर्पयेत्।
यज्ञादिषु विवाहादौ प्रदर्श्य निखिलं हरेः।।

गृहीत्वैव तदादेशं पश्चात् कार्याणि साधायेत्।
न स्वार्धभुक्तं कृष्णाय समर्प्यमिति निश्चयः।।

ना सामिभोगः संप्राप्तो ह्यसमर्पितवर्जनात्।
तथापि मानसं पूर्वादाय च समर्पणम्।।
अभुक्तमप्यतो ब्रह्मसम्बन्धो विभ्रमात् पुरा।
गृह्णीयदवशिष्टं तुं प्रभवेऽपि समर्पयेत्।।

तदर्थं वर्जितं भेदेनार्धमुक्तसमर्पणम्।

असमर्पितवस्तूनामत्र सामान्यमुच्यते।।

भुक्तेत्यनेनात्र भोग्यवस्तुभोगो निरूप्यते।
स चोपयोगरूपो हि तसमाद् विबुध्यताम्।।

निवेदितपदार्थानां ग्रहणं मार्गभेदतः।
पूजामार्गनिषेधानामत्रावसरो मतः।।

एवं जन्मावधि नृणां भावनातो भविष्यति।
सर्वत्र ब्रह्मसम्बन्धो ग›ातोऽन्यजलेष्विव।।

चिन्ता निवेर्दिभिर्नैव नवरत्ने निरूपिताः।
तत एवावगत्येह कार्या इति विनिश्चयः।।

ततो हि जातसंस्कारः सर्वचिन्ताविवर्जितः।
साक्षिवत् तत्कृति पश्यन् सुखं सेवापरो भवेत्।।[22]

**सेवानियमाः—**

हरिराय महोदयेन नित्यसेवा विधिविचारोपरान्ते के सेवानियमाः सन्ति इत्यपि वर्णिताः सन्ति। सेवाविधिविषये भगवद् मूर्तेः सेवा विधीयते। तेनोक्तम् मूर्तेः भगवद् ज्ञानं साकारवेशतः अवधेयम्। पूजामार्गे मन्त्रविधानात् सेवनम् भवति। अत्र विशेषरूपेण भक्तिमार्गो अयं पुरुषोत्तमरूपिणः भवति।

सेवा·पि द्विविधा भवति। त्याग, अत्याग भेदतः अत्यागे·पि व्यावृत्तेः अत्यागतः पूर्वमेव भवति।

त्यागवृत्तौ अपि मानसत्यागः उत्तमः कथ्यते। गृहस्थानं कृते अत्याग पक्षे सुकर साधानम् अनुकूलम् भवति।

कृष्णमूर्तिपूजनम् यथा लब्धोपचारैः हरिं संपूज्यते। कथम् ? सामग्रीं संपाद्य हरिं उत्थाय च प्रातः आरभ्य सेवा–पूजा विधीयतताम्। आचार्येणोक्तं सेवायां लौकिकोक्तिः प्रयुक्तम्।

सेवाविधिः समग्रोऽपि क्रमेणैव विलिख्यते।
प्रकारोत्तमतः पूर्वं मूर्तौ सेवा विधीयते।।
मूर्तो भगवतो ज्ञानं साकारावेशतो मतम्।
भक्तिमार्गप्रकारेण ज्ञानतस्तु तदात्मता।।
पूजामार्गं भवेनमन्त्रविधानात् पूज्यसेवनम्।
विशेषो भक्तिमार्गोऽयं पुरुषोत्तमरूपिणः।
मणिस्पर्शेन तामाद्रि सौवर्णामिव तत्वतः।
अतसतत्र कृतं सर्वं साक्षात् कृष्णे कृतं भवेत्।।

सेवा तु तस्य द्विविधा त्यागात्यागविभेदतः।
अत्यागेऽपि तथात्वं हि व्यावृत्तेस्त्यागतः पुरा।।

व्यावृत्तावपि च प्रोक्तो मानसस्त्याग उत्तमः।
अत्यागपक्षे गार्हस्थ्यमनुकूलं हि साधने।।

गृहे स्थित्वा सेवानाार्थं स्वधर्मेणैव सर्वथा।
कृष्णं भजेद्यतोऽधर्मकरणाद्धीनयोनिता।।

कृष्णमूर्तौ यथालब्धैद्रव्यैः सम्पूज्येद्धरिम्।
पूर्वं स्थानं मन्दिरादि तथा सिंहासनादि च।।

सम्पाद्य भागसामग्रीं हरिमुत्थाप्य मञ्चतः।
प्रातरारभ्य सवापि सेवा पूजा विधीयताम्।।

सेवायां लौकिकी युक्तिस्तथा स्नेहो नियामकः।
पूजायां तु विधिः स्नेहविरुद्ध इति निश्चयः।।

**गुरुसेवा :–**

अत्र नियमः निष्पादिताः भक्तिमार्गीय कृष्ण सेवा परायणः दम्भरहितः भागवत तत्वज्ञः एव गुरुः भवेत्।

गुरोः उपदेशानुसारेण कार्यं कर्तव्यम् इति। अयं वस्तुनाम् उपयोगेः नियमः वर्तते। भार्यादीनाम् आनुकूल्य सेवां कुर्यात्। धर्मशास्त्रानुसारेण च स्वचित्तं हरौ प्रतिष्ठाय यत्नं कारयेत्।

गुरुश्च भक्तिमार्गीयः कृष्णसेवापरायणः।
श्रीभागवततत्वज्ञो दम्भादिरहितो नरः।।

तदभावे तथाभूतोपदेशोऽत्र नियामकः।
अथाधुनिकतीर्थानामतथाभूततोऽपि हि।।

उपदेशस्तथाभूतगुरोरिव फलिष्यति।
यदि दुःसङ्गदोषेण नान्यथा चेद् भवेन्मतिः।।

सेवायामपि यस्तादृग्गुणोक्तः परा विधिः।
स एव सर्वथा नान्यः कल्पितः फलसाधकः।।

अनुद्वेगाय सप्रेम कृष्णमूर्तावलंकृतिः।
वस्त्रैराभरणैर्वापि तथोपहरणैरपि।।

यथा स्वरूपसौन्दर्यं स्वमनोरोधकं भवेत्।
यतो हि सेविना प्रोक्ता चेतस्तत्प्रवणं हरेः।।

लीलाविशिष्टरूपे हि तदर्थं सेवनोद्यमः।
अतः साधनता प्रोक्ता तनुवित्तजसेवने।।

एवमत्रादिवस्तूनामुपयोगे प्रसाधिते।
भार्यादीनामानुकूल्ये तैः सेवामेव कारयेत्।।

स्वयं कुर्यादुदासीनतया तेषां पुनः स्थितौ
अपकीर्तिभयात् कृष्णसेवावैयुग्यसम्भवात्।।
स्वकृतब्रह्मसम्बन्धं विभाव्य हृदि सवर्था।
तत्पोषणं प्रकृर्वीत रुग्णदेहवदातुरः।।

यद्यासुराः कृष्णसेवां कर्तुं न ददाति स्यतः।
तदा तेषां परित्यागः कर्तव्य इति निश्चयः।।

भक्तिमार्गे न वस्तव्यभक्तैःसह सर्वथा।
अ›ीकृत्यापि च स्मार्तवर्जनं भक्तिमार्गभिः।।

धर्मशासत्रातुः बलवद् भक्तिशास्त्रमिति स्थितिः।
चित्तं हरौ प्रतिष्ठाय वृत्तियत्नं च कारयेत्।

सर्वथा वृत्यभावे तु यामं सेवापरो भवेत्।
वृत्तेः सहजतासिद्धये कृष्णमात्ररतो भवेत्।।

**विमुखता**

यत्नेन वैमुक्त्यं वारयेत्। श्रीमद्भागवत पाठम् –नियमतः कर्तव्यम् इति। लोभ रहिताय वैराग्यं पारितोषं च भावयेत्। अस्य जन्मनः अन्तिमत्वम् कृतार्थत्वम् च विचारयेत्।

हर्यर्थमपि यत्नेन जातवैमुख्यवारणे।
श्रीभागवतपाठं च विदध्यान्नियमेन हि।।

चित्तक्षोभज वैमुख्याभावाय पुरुषं सहेत्।
मानयेदपि कृष्णोक्तमित्येवोत्साहसिद्धये।।

वैराग्यं परितोषं च लोभाभावाय भावयेत्।
जन्मनोऽप्यन्तिमत्वं वै कृतार्थत्वं च चिन्तयेत्।।

**सेवाविचारः**

सेवाविचारविषये आचार्येण सप्ततिः श्लोक पर्यन्तं वर्णनं कृतम् इति।

प्रथमे हि अन्तःकरणं स्पष्टीकृत्य पितृवत् हरौ विश्वासं दृढ़तरं करणीयम्। लौकिक रीत्या च सेवा करणीया। भगवतः देशकालौ विचारयैव अपस्थाम् च स्वीकृत्य कार्यं करणीयम्।

सेवाकालद्वये कालत्रये, काले च कुर्यात्। स्वधर्मम् आचरेत्। इन्द्रियाजां निग्रहजम् कर्तव्यम्। श्रीकृष्णं सर्वात्मक ज्ञात्वा हृदये दीनताम् भायवेत्। अहं करोमि इति अहंकारं परित्यजेत्।

एवं निश्चयं चित्तेन निरपेक्षो दृढान्तरः।
स्थिरान्तःकरणं कृत्वा विश्वासं पितृवद्धरौ।।
सेवयेत्तत्परो भुत्वा युक्त्या लौकिकया पुरा।
देशाकालौ विचार्यैवमवस्थां च प्रभोरपि।।

तदर्थं व्यथवचनं कृतिसाध्यं परित्यजेत्।
कृष्णे समर्पयेनैव क्लिष्टं क्वापि प्रयत्नतः।।

इष्टं लोके तथा स्वस्ययच्चिरं चित्तचिन्तितम्।
तद्वै समर्पयेद् भक्त्या भक्तिसम्बन्धि सर्वथा।।

तथानवसरे सेवाबाहुरेऽपि मुख्यवत्।
कार्या बुद्धिः कृष्णकार्ये वस्त्रप्रक्षालनादिके।।

काले कालद्वये कालत्रये कूर्वीत् सेवनम्।
स्वधर्ममाचरेदङ्गं नित्यं नैमित्तिकं तथा।।

निवृत्तिराग्रहेणैव विधर्मादिति निश्चयः।
धर्मसिद्धावपि पुनवैशिष्टयात् कृष्णधर्मतः।।

इन्द्रियाश्चविनिग्राहः कर्तव्यः सर्वथा मतः।
परोपकारधर्माणां दौर्बल्यं च विभावयेत्।।

एवं प्रकुर्वतः कृष्णावेशाद्याद्धि भवेत्पुनः।
तत्सेवासाधने निष्टा तस्मान्नित्यं हि सेवयेत्।।

कृष्णं सर्वात्मकं ज्ञात्वा दीनतां हृदि भावयेत्।
अहं करोमीत्येतादृगहंकारं परित्यजेत्।।

**जपपाठ–नियमाः**

यो जनः जपपाठं करोति तद् विषये एते नियमाः भवेत्। यथा –

1. स्वचित्तं निर्भयरूपेण श्रीकृष्णे भावयेत्।
2. मुख्यसाधनं भगवद्कीर्तनं भवेत्।
3. दम्भरहितेन स्वप्रयत्नं भेवत्।
4. भगवद्सेवायां सम्मानं नेच्छेत्।

सेवायामपि सम्मानं नापेक्षेत हरेः पुनः।
गुणान् गायेदथो नाम कीर्तयेत् सदसि स्थितः।।

निर्भयो निःस्पृहः कृष्णे स्वतश्चितं निवेशयेत्।
मुख्यं तु साधनं नित्यं श्रीभागवतकीर्तनम्।।

अदम्भेभानिमित्तेन स्वप्रयत्नेन सर्वथा।
सेवान्तर्गतपूजा›शङ्खचक्रादि धारयेत्।।

**तिलकमाला**

अस्मिन् सम्प्रदाये तिलकविषये मालाविषये च नियमाः के ? तद्यथा–

पूजा›ानि कानि – शंख, चक्रं, चिन्हानि, तुलसीमालां धृत्वा तिलकं कुर्यात्। यदा श्रीकृष्णविषयेकोत्सवाः ते एकादशी, जन्माष्टमी, श्रीकृष्णजयन्ती व्रतानि च एतैः नियमाः ग्रहादीनां पालनीयाः भवेयुः।

चिह्नत्वात् तुलसीमाला धार्यां जिलकमेव च।
वैष्णवेन मतेनैकादश्यादिव्रतमाचरेत्।।

उत्सवत्वेन कृष्णाष्टम्यादीनां व्रतमाचरेत्।
अन्येष्वयुत्सवत्वेन विज्ञानं सर्वथा मतम्।। –

निर्णयोऽपि तथा कार्यो जयन्तीव्रतवन् न हि।
एवं कुर्वन् गृहस्थस्तु कृतार्थः स्यान्न संशयः।।

**ब्रह्मचारी–वानप्रस्थ–सन्यासीनां धर्मः**

अत्र एकादशश्लोकेषु पूर्वाक्तानां धर्माः निगदिताः। ब्रह्मचारिणः कृते त्यागभावेन नियमाः कथिताः। विशेषरूपेण तीर्थटनं कर्तव्यम्। संग्रहीताः स्वतन्त्र नित्यः पर्यटकः भवेत्। विक्षेपादि दोषाणां सम्भवे तिथि पर्यटनं मतम्। स्वभवनं त्यक्त्वा यत्र भगवतः जनाः स्युः तत्र कृष्णसेवा कथादि श्रवणं कर्तव्यम्। दुष्टसंगः त्याज्यम् अस्ति।

अन्येषां ग्रहस्थादीनां कृते नियमाः अस्ति गृहं त्यक्त्वा भजनबाधकं जनम् च त्यक्त्वा कृष्ण कथादिभिः सेवा करणीयाः। कृष्णस्य त्रिकालसेवाः च करणीया।

सम्भवे साधनानां स्याद्ववस्थब्रह्मचारिणोः।
यतेस्त्यागात्मको मार्गस्तीर्थाटनविशेषणः।।
स्वतन्त्रः सङ्गरहितो नित्यपर्यटकस्तथा।
तद्दिनात्रप्रतिग्राही निर्लज्जो कीर्तयेत्।।

पश्यन् गुह्यानि च हरेः शान्तः कृष्णपरायणः।
अव्यग्रवृत्तिः कृष्णैकप्रादुर्भावप्रयोजनः।।

एवमादेहसम्प्राप्तं यतिः कुर्याद् विचक्षणः।
विक्षेपद्यादि दोषाणां सम्भवे सकलाश्रमे।।

अनेनैव प्रकारेण तीर्थपर्यटनं मतम्।
भार्यादिप्रतिकूल्ये तु भिन्नस्त्यागो विधीयते।।

त्यक्त्वा स्वभवनं गत्वा यत्र भगवता जनाः।
हरिस्थाने तदीयाश्च कृष्णसेवाकथाप्रियाः।।
कृष्णार्थी सर्वथा त्यक्त्वा गृहं भजनबाधकम्।
तैः सहैव वसेत् कृष्णसेवाकृतिकथादिभिः।।

दुःस›दुष्टवस्त्रान्नसम्बन्धसभयात्मता।
यतः ससाधनस्तिश्ठेत् सावधानतया हरौ।।

ततः  सेवाकथासक्त्या सर्वथा प्राप्तिरुत्तमा।
नैकान्ते संस्थितिः कार्या हार्दबाधकसम्भवे।। –

रक्षकत्वं हरेरेव स्वस›ऽपि च यास्यति।
अथवा केवलं शास्त्रं श्रीभागवतमादरात्।।

त्रिकालं सेवयेद् रुपसेवावदतियत्नतः।
प्रकारत्रितयाभावे प्रपत्तिरपि चोच्यते।।[23]

महास्थाने यत्र पूजाप्रवाहो जायते पुनः।
तत्र तत्परतास्थित्या कृतार्थत्वं सदा स्थितौ।।

नन्वत्र भक्तिमार्गीयफलाद् भेदो न विद्यते।
कृष्णसेवातत्परत्वात् सर्वथा देहयोगतः।।

तथापि मार्गवैधर्म्यं प्रीतेरदृढ़तात्र हि।
चिरकालं सेवितापि मूर्तिवैयग्यसम्भवे।।

तद्दोषदर्शनाादाशु त्यजते तदनाग्रहात्।
स्थानान्तरगतौ नैव फलं ब्रह्मास्त्रदर्शनात्।।

अतो न मार्गस्योत्कर्षो भक्तिमार्गस्य सम्भवे।
न बुद्धिमांस्तत्र यतेद् अन्यथा तु स उत्तमः।।

एवं समाश्रये धर्मस्तथा सर्वसमर्पणे।
सेवायामपि कृष्णस्य संक्षेपेण निरूपितः।।

श्रीममदाचार्यचरणशरणैस्तु मदुक्तिभिः।
अनुवादकरूपाभिर्ज्ञात्वा सर्वं विधीयताम्।।

समुदितनिजमार्गबोधतुष्टः
शरणगताखिलजीवस›जुष्टः।
निरुपधिकरुणारसैकपुष्टः कृप्यतु
मे मयि वल्लभः प्रभुः सः।।[24]

## नित्यसेवान्हिकविधिविचारः

अथ श्रीवल्लभं नत्वा नित्यसेवाविधिः प्रभोः।
तदुक्तभक्तिमार्गीयप्रकारेण प्रदर्शये।।

वल्लभाचार्यमार्गयप्रभोर्बालास्वरूपिणः।
स्वामिनीसयुज्योवाऽथसेवांनित्यंसमाचरेत्।।

प्रातः शय्यास्थितः श्रीमदाचार्यचरणाश्रितः।
स्मरन्भगवतो रूपलीलानामानि च क्रमात्।।

श्रीगोवर्द्धननाथादिसप्तनामानि कीर्तयेत्।
सह वल्लभविभुविट्ठलेशादिनामभिः।।

उत्थितः प्रावृतशिरा मलमूत्रं समुत्सृजेत्।
विधिवत्कृतशौचः स्यात्सततं च मृदम्भसा।।

गण्डूपैर्दन्तकाष्ठैर्वा भस्मना दन्तधावनम्।
कुर्याद्गोवर्धनेशादिचरणामृतभक्षणम्।। –6
वीटकं चास्य शुद्धयर्थं भक्ष्येदव्रती जनः।
तैलाभ्यक्तो यथा स्नात्वा ललाटादिस्थलेऽपितान्।।

लिखेच्चन्दनकाश्मीरैरुदर्ध्वं द्वादशपुण्ड्रकान्।
विप्रोऽथ क्षत्रियोवार्द्ध वैश्यः शूद्रस्तदर्धकम्।।

तन्मध्येऽधः पञ्चमुद्रां गदा वा रूप्यकांस्यजाम्।
उपरि श्रीवल्लभीयां मुद्रां नारायणीं च वा।।

इतरा›ोद्र्ध्वपुण्ड्रेषु शङ्खचक्रादिकन्यसेत्।
श्रीगोपीचन्दनमृदा सम्पायानपुसारतः।। –

सोत्तरीयांबर प्रातः सन्ध्यां चोपस्य वाग्यतः।
आगतो मन्दिरद्वारि देहलीं प्रणमेत्प्रभोः।।
कुर्यात्कीलोशृ›लितपाटोद्घाटनं ततः।
आदीप्य दीपं तमसि ततोद्भिः क्षालयेत्करी।।

मन्दिरे मार्जनं कुर्यात्ल्लेपनं भाण्डवाससाम्।
शोधनं शयनोपान्तमाल्यादेरपसारणम्।।

प्रक्षालितकरः सिंहासने विच्छाद्येत्पटम्।
शीते तूलपटीयत्याद्यमुपधानादिकं न्यसेत्।।

वामे भृङ्गारिकापात्रं कारिपूर्णं च वोटकान्।
दोलोत्सवादितो दीपमालिकान्तं सितं मतम्।।

उपधानास्यवसनमासनं पदपट्टिका।
पश्चाच्छय्यास्तृतिपटीपीठकास्तरणं तनु।।
दीपालिकादि दालान्तं सितमाच्छादनान्बरम्।
मुखवस्त्रं चाङ्गवस्त्रं नान्यदित्याशयन्धरेत्।।

संसाध्य मङ्गलं भोगं घण्टादिध्वनिपूर्वकम्।

पूर्वं प्रबोध्याचार्याख्यपादुकात्मकमीश्वरम्।।
तद्वारतः पठन् स्तोत्रं प्रबोधं वा प्रबोधयेत्।
शीते तु संताप्य करौ हसन्त्यां वन्हिसंयुजि।।

स्पृशंस्ताभ्यां तल्पगतं तूलपटयाग्रहं प्रभुम्।
विनीतः प्राज्जलि बूयान्महाराजाधिराज भोः।।

राजीवलोचन विभो यशोदोत्स›लालितः।
शरण्याऽशरणापन्न शरणागतवत्सलः।।

जय प्रभो जय जय जहाजामजितेति च।
क्लमप्रसुतकुन्तलं गलितबर्हभुपं विभोः।
पुनः प्रकृतिचापलं प्रणायिनी भुजायन्त्रितम्।।

ममस्फुरतुमानसेमदनकेलिश्योत्थितः।
प्रावृतं तूलप्रावार्या रौप्यसिंहासने प्रभुम्।।

प्रियां चाऽऽस्याम्बरं वामं वेणुं दक्षिणोन्यसेत्।
प्रणतः शोधयित्वाद्भिर्वासता पुरतः प्रभोः।।

निर्णिक्तपाणिरादध्यात्पीठके भोगम›लम्।
पक्कान्नं दधिदुग्धं च नवनीतं सितायुतम्।।

विभवे सत्यभावे तु यथाशक्ति निवेदयेत्।
पुनः शय्यामन्तरेत्यास्तरेन्मार्जनपूर्वकम्।।

तद्धस्तात्स्तरेत्तूलपटिकास्तरणीं हिमे।
प्रबोधिनीतो दोलान्तमन्यदास्रणीं सिताम्।।
घटिकोत्तरमुत्सार्य भोगमाचामयेद्विभुम्।

पत्रेणचमनीयेन् मुखे प्रोच्छयाऽऽस्यवाससा।।
निवेद्य वोटकान् पार्श्वे प्रभुं नीराज्येत्तः।
प्रणम्य निर्णिक्तसन्तापितपाणिः प्रभोः पुनः।।

रात्रिश्रृ›ारमुत्तार्य पुष्प्यचन्दनलैपतः।
उद्वर्त्तयेत्पित्तले वा ताम्रपत्रं स्तृतासने।।
स्थितस्यां› कोष्णजलैः स्नानपयेद्वेदमन्त्रतः।
कोमलश्वेतवस्त्रेण प्रोच्छाय› सम्प्रसाधयेत्।।
शृ›ारार्थं प्रतिष्ठाप्य प्रभुं शृ›ारपीठके।[25]

# सन्दर्भ–सूची


1. पु. भ. से. बृ. –15
2. शुक्ल यजुर्वेद – 11
3. पु. भ. से. पृ. –17
4. कृष्ण यजुर्वेद –
5. कृष्ण यजुर्वेद –
6. निर्णयसिन्धुः
7. गणेशपुराण
8. पुष्टिमार्गीय भगवत्सेवोपयोगी–पृ.–70–71
9. पुष्टिमार्गीय भगवत्सेवोपयोगी–पृ.–70–71
10. पु. प्र. –18
11. श्रीमद.भा.10–84–14
12. श्रीमद् भाग.10–3–9
13. श्रीमद् भाग.10–3–10
14. श्रीमद.भाग.10–5–1
15. श्रीमद भाग.10–5–10
16. श्रीमद भाग.10–35–22
17. श्रीमद भाग.10–32–13
18. तै. उप.–2
19. पूजनप्रवाह
20. श्रीमद भाग.10–32–14
21. श्रीमद भागव.2–4–14
22. वमार्गीय शरण–समर्पण, श्री हरिरायमहाप्रभु, – 1–100

## 2.शुद्धाद्वैतसम्प्रदाये कर्मकाण्डविषये आचार्यमतम्

शुद्धाद्वैतसम्प्रदायः वैदिकसम्प्रदायः वर्तते। अनेन कारणेन वेदोक्त–कर्मणां कर्मकाण्डविषयाणां सर्वान् प्रकारान् स्वीकरोति। तत्र नित्यकर्म नैमित्तिककर्म तथा च व्यासोक्त संस्काराणां विधिं प्रकारं सर्वं स्वीकरोति। अत्र सर्वप्रथमं संस्कारविषये विविच्यते। विविधगृह्यसूत्रेषु संस्कारविषये ईदृशं वर्णनं प्राप्यते। तद्यथा –

**ऋग्वेदस्य आश्वालयन–गृह्यसूत्रसंस्करः**

1.गर्भाधानसंस्कारः
2.पुंसवनसंस्कारः
3.सीमन्तसंस्कारः
4.जातकर्मसंस्कारः
5.नामकरणसंस्कारः
6.मुण्डनसंस्कारः
7.उपनयनसंस्कारः

**शांड्खायन–गृह्यसूत्रः –**

1.विवाहसंस्कारः
2.गर्भाधानसंस्कारः
3.पुंसवनसंस्कारः
4.सीमन्तसंस्कारः
5.जातकर्मसंस्कारः
6.नामकरणसंस्कारः
7.अन्नप्राशनसंस्कारः
8.चूडाकरणसंस्कारः
9.उपनयनसंस्कारः
10.समावर्तनसंस्कारः

**कृष्णयजुर्वेदस्य आपस्तम्बगृह्यसूत्रः –**

1.गर्भाधानसंस्कारः
2.पुंसवनसंस्कारः
3.सीमन्तसंस्कारः
4.जातकर्मसंस्कारः
5.नामकरणसंस्कारः
6.मुण्डनसंस्कारः
7.उपनयनसंस्कारः

## कृष्णयजुर्वेदस्य बौधायनगृह्यसूत्रः –

1.गर्भाधानसंस्कारः 2.पुंसवनसंस्कारः
3.सीमन्तसंस्कारः 4.जातकर्मसंस्कारः
5.नामकरणसंस्कारः 6.निष्क्रमणसंस्कारः
7.उपनयनसंस्कारः

## मानवगृह्यसूत्रे संस्कारः –

1.गर्भाधानसंस्कारः 2.पुंसवनसंस्कारः
3.सीमन्तसंस्कारः 4.जातकर्मसंस्कारः
5.नामकरणसंस्कारः 6.चौलक्रमसंस्कारः
7.उपनयनसंस्कारः

## काठकगृह्यसूत्रे –

1.गर्भाधानसंस्कारः 2.पुंसवनसंस्कारः
3.सीमन्तसंस्कारः 4.जातकर्मसंस्कारः
5.नामकरणसंस्कारः 6.चौलक्रमसंस्कारः
7.उपनयनसंस्कारः

## यजुर्वेदस्य पारस्करगृह्यसूत्रे संस्कारः –

1.गर्भाधानसंस्कारः 2.पुंसवनसंस्कारः
3.सीमन्तसंस्कारः 4.जातकर्मसंस्कारः
5.नामकरणसंस्कारः 6.निष्क्रमणसंस्कारः
7.उपनयनसंस्कारः 8.चूडाकरणसंस्कारः
9.उपनयनसंस्कारः 10.केशान्तसंस्कारः
11.समावर्तनसंस्कारः 12.विवाहसंस्कारः

## सामवेदस्यजैमिनिगृह्यसूत्रे संस्कारः –

1.गर्भाधानसंस्कारः
2.पुंसवनसंस्कारः
3.सीमन्तसंस्कारः
4.जातकर्मसंस्कारः
5.नामकरणसंस्कारः
6.चूड़ाकरणसंस्कारः
7.उपनयनसंस्कारः
8.समावर्तनसंस्कारः
9.विवाहसंस्कारः

## वराहगृह्यसूत्रे –

1.गर्भाधानसंस्कारः
2.पुंसवनसंस्कारः
3.सीमन्तसंस्कारः
4.जातकर्मसंस्कारः
5.नामकरणसंस्कारः
6.अन्नप्राशनसंस्कारः
7.उपनयनसंस्कारः
8.समावर्तनसंस्कारः
9.नामकरणसंस्कारः
10.विवाहसंस्कारः

## कौषीतकगृह्यसूत्रे संस्कारः –

1.विवाहसंस्कारः
2.गर्भाधानसंस्कारः
3.पुंसवनसंस्कारः
4.सीमन्तसंस्कारः
5.जातकर्मसंस्कारः
6.निष्क्रमणसंस्कारः
7.अन्नप्राशनसंस्कारः
8.कर्णविधिसंस्कारः
9.चूड़ाकरणसंस्कारः
10.उपनयनसंस्कारः
11.समावर्तनसंस्कारः

गोभिलगृह्यसूत्रे द्वितीयप्रपाठकस्य पच्चमकण्डिकायाम् –

विवाहे व्रतबन्धे च शालायां चौलकर्मणि।
गर्भाधानादिसंसकारः पूर्णाहुतिः न कारयेत्।।[1]

पुराणेषु षोडशसंस्कारः प्रचलितः वस्तुतः अष्टचत्वारिंशत संस्काराः अवगम्यते किन्तु समयान्तरे तेषां लोपः जातः। एवं मुख्यतः षोडशसंस्कारः उक्तः। यथा –

गर्भाधानमतश्च पुसंवनकंसीमन्तजाताभिधे।
नामाख्यं सह निष्क्रमेण च तथाऽन्नप्राशनं कर्म च।।
चूडाख्यं व्रतबन्धकोप्यथ चतुर्वेदव्रतानां पुरः।
केशान्तं सविसर्गकः परिणयः स्यात् षोडशी कर्मणाम्।।[2]

एतेगर्भाधानादिषोडशसंस्काराः सर्वेषामेव ।
एतेचद्विजानामेवसमंत्रकाः।।[3]

1.गर्भाधानसंस्कारः 2.पुंसवनसंस्कारः
3.सीमन्तोन्नयनसंस्कारः 4.जातकर्मसंस्कारः
5.नामकरणसंस्कारः 6.निष्क्रमणसंस्कारः
7.अन्नप्राशनसंस्कारः 8.चूड़ाकरणसंस्कारः
9.उपनयनसंस्कारः 10.वेदारम्भसंस्कारः (ऋग्वेदारम्भः
11.यजुर्वेदारम्भसंस्कारः 12.सामवेदारम्भसंस्कारः
13.अथर्ववेदारम्भसंस्कारः 14.केशान्तसंस्कारः
15.समावर्तनसंस्कारः 16.विवाहसंस्कारः

मनुः पवित्र वैदिक कर्मसय सम्पन्न शारीरिक–संस्काराणां अधिकं महत्वं प्राप्तं वर्तते। विविधसंस्कारविषये विधिवत वर्णनं विस्तारपूर्वकं प्राप्यते। यथा –

| | **संस्कारस्य नामानि** | **कर्माणि** |
|---|---|---|
| 1 | गर्भाधान | गर्भशुध्यर्थकर्मः |
| 2 | पुसंवन | गर्भाधाानानन्तर पुत्र प्राप्ति उद्देश्यार्थे कार्यः |

| | | |
|---|---|---|
| 3 | सीमन्तोन्नयन | गर्भस्य चतुर्थे, षष्ठे, अष्टमे वा गर्भिणी सीमन्त केशविभाजनम् |
| 4 | जातकर्मः | जननबालकस्य सुवर्ण–घृतप्राशनादि कर्मः |
| 5 | नामकरण | नामकरणादि कर्म |
| 6 | निष्क्रमण | बालकस्य चतुर्थे मासे गृहात् बहिनिष्क्रम्य सूर्यदर्शयेत |
| 7 | अन्नप्राशन | षष्ठेमासे प्रथमतः षट्रसान् प्राश्य |
| 8 | चूड़ाकर्म | केशमुण्डन |
| 9 | उपनयन | यज्ञोपवीतधारणम् |
| 10 | केशान्त | उपनयनसंस्कारान्तर्गत शरीरेस्थितकेश–श्मश्रु कर्तनादादि कर्मः |
| 11 | समावर्तन | वेदाध्ययन पश्चाद् व्रतसमाप्य गृहस्थाश्रम प्राप्तिहेतु कार्यः |
| 12 | विवाहः | स्त्रीपुरुष परस्पर दाम्पत्य सूत्रे बन्धनम् |

---

## सन्दर्भ–सूची


1. गोभिल–गृह्यसूत्र
2. संस्कार भास्कार–पृ.1, श्लोक–1
3. संस्कार भास्कार

## 3. कर्मकाण्डविषयिकी विविधसम्प्रदायेषु एकरूपता

चतुर्वेदेषु ये मन्त्राः सन्ति तन्मध्ये आसीति सहस्रात्मकाः मन्त्राः कर्मकाण्डस्य एव। भारतीयसम्प्रदायेषु पञ्चसम्प्रदायाः वैदिक–सम्प्रदायरूपेण स्वीक्रियते।

प्रथमो सम्प्रदायः शाङ्करसम्प्रदायः वर्तते। यस्य वादः अद्वैतवादरूपेण प्रसिद्धः वर्तते।

द्वितीयसम्प्रदायः रामानुजाचार्यस्य विशिष्टाद्वैतरूपेण प्रसिद्धः अस्ति।

तृतीयसम्प्रदायः मध्वसम्प्रदाय यः द्वैतरूपेणप्रसिद्धः अस्ति।

चतुर्थः निम्बार्कसम्प्रदायरूपेण प्रसिद्धः अस्ति। यस्य प्रसिद्धः द्वैताद्वैतरूपेण ज्ञायते।

पञ्चमो सम्प्रदायः वल्लभचार्येण पवर्तितः। यः पुष्टिमार्गेण ज्ञायते। अस्य अपरनाम शुद्धौद्वैत सम्प्रदायः अस्ति।

ये सम्प्रदायाः पूर्वोक्ताः ते कर्मकाण्डस्य स्वरूपं स्वीक्रियन्ते किन्तु स्व–स्वसम्प्रदायानुसारेण न्यूनाधिकरूपेण विधिः प्रयुज्यते। तत्र वैदिकविधिः प्रायेण सर्वैः स्वीक्रियन्ते। पौराणिकविधिरूपेण केचित आचार्याः स्वीक्रियन्ते केचित नाऽपि।

अत्र गृह्यसूत्रानुसारेण विविध देवादीनाम पूजनं सर्वैः स्वीक्रियते। यज्ञयागादि विषये मतैक्यं नास्ति। यतोहि केचित यज्ञाः श्रौतयज्ञाः भवन्ति तथैव केचित यज्ञाः स्मार्तयज्ञाः भवन्ति ये प्रायेण स्वीक्रियन्ते। प्रायेण यज्ञयागादि विषयः यजुर्वेदे प्राप्यते । यजुर्वेदेऽपि श्शुक्लयर्जुर्वेदे अनेकेयागाः प्रसिद्धाः आसन्। सम्प्रति एतादृशाः यागाः न भवन्ति न च कोऽपि क्रियते, न च कोऽपि करोति। अत्र वैदिक यागानां विवेचनं प्रस्तूयते। शुक्लयजुर्वेदे निमनलिखितयागाः प्राप्यन्ते। तद्यथा –

1. सौत्रामणियागः
2. राजसूययागः।

3. अश्वमेध्यागः।

4. पुरुषमेधयागः।

5. सर्वमेधयागः।

6. अन्ययागः।

**1.सौत्रामणियागः –**

सौत्रामणियागः द्विविधः। प्रोक्तस्तैत्तरीये बौधायनपस्तम्बादिभिश्च –चरकसौत्रामणि कौकिलसौत्रामणि च इति। तत्र चरकसौत्रामणि स्वतन्ता, चयना›भभूता च। अस्यां त्रयः पशवः। यथा–अजो धूम्रवर्णोऽश्विदेवताकः, मेषः सरस्वतीदेवताकः, मेष एव चन्द्रदेवताकः। निरुढपशुबन्धकल्पेन त्रयाणां सहैव अनुष्ठानम्, अत्र वपायागानन्तरं सराग्रहग्रहणं यद्यपि ब्रह्मणश्रौतसूत्रादावक्तं तथापि तस्य कलीं निषिद्धत्वात तद्विकल्पतया आपरस्तम्बादिभिः पयोग्रहाणां विधानात तैरेव यागोऽनुष्ठीयते।

**2.राजसूययागः –**

राजसूय राजा सूयते अभिभूषयते सोमो यागार्थमत्रैति व्युत्पत्तौ राजसूयशब्दो निष्पद्यते।[1] क्रर्तुरयं राज्येऽभिषिक्तेन राज्यधुरं वहता क्षत्रियेणाऽनुष्ठेयः। अयं च प्राचीनसमये तादृशैरेव राजाभिः विशेषतः सूर्यवंशीयैः सोमवंशीयैश्चाऽनुष्ठित इति ज्ञायते।[2]

महाभारते च युधिष्ठिरेणानुष्ठितो राजसूययगस्साधुं वर्णितोऽस्ति। तदनन्तरकालिकाश्च राजानः तं बहवोऽन्वस्तिठन्निति पुराणेभ्यः शिला–लेखादिभ्यश्च प्रमाणेभ्योऽवगच्छामो वयम्।

**3.अश्वमेधयागः –**

अश्वमेधयागस्य स्वरूपं – यो नामैकच्छात्राधिपतिः सार्वभौमः, अर्थात् समग्रस्य भूमण्डलस्य शासिता, यस्य वशेऽन्ये सामन्ता राजानो वर्तन्ते तेनैवायमनुष्ठेयो यज्ञः। न साधारणक्षत्रियस्य ब्राह्मणवैश्ययोर्वा तत्र अधिकारः। अयं मुख्यः कल्पः। असार्वभौमस्याप्यत्राऽधिकारं, गौणतया मन्यन्ते सूत्रकाराः आपस्तम्बप्रभृतयः। कात्यायनस्तु राजसामान्यधिकारिकं

राजसूयवदिमं यज्ञं कथ्याति। अतः राजयज्ञः इत्यप्यस्य व्यपदेशं पश्यामो ग्रन्थेषु। श्रौतकर्ममध्ये यागोऽयं प्रधानतममलभत स्थानम्।

**4.पुरुषमेधयागः –**

पुरुषमेधयागोऽपि वेदेषु विहितो यागो दृश्यते। पुरुषमेधः अश्वमेधवत सोमयाग एव। स पञ्चसुत्यात्मकः पञ्चाहः अहीनः क्रतुः। अत्र श्रवणमात्रेणैवं प्रतीयते–यथा अश्वमेधे अश्वस्य संज्ञपनविशसनादिकं कृत्वा यागः क्रियते तदीयाङ्गैः एवमत्रापीति। कथयन्त्यापि लिखन्त्यापि च केचनैवं तत्र , परं वस्तुगत्या नैवं तथा। ऐतरेयब्राह्मणगतं शुनश्शपोपाख्यनं प्रमाणतया प्रदर्शयन्ति, न तदपि युक्तम्। तत्र हिंसाया अविधानात्। जीवत एव शुनश्शेपस्य परित्यागोक्तेः, तत्र कारणकथने या कापि भङ्गी समाश्रिता भवतु, फलतो जीवत उत्सर्गस्यैव निधानम्।

**5.सर्वमेधयज्ञः –**

सर्वमेधाख्यः क्रतुरपि सोमयागविशेष एव, तत्र दश सुत्या, द्वादश दीक्षाः, द्वादश उपसदः। एवं चतुस्त्रिंशददिनसाध्योऽयं यागः। इष्टकाभिस्सम्पादितायाश्चितेरुपरि आहवनीयाग्निस्थापनं कृत्वा तत्रैव यागः। सुत्यासु पञ्चमी सुत्या अश्वमेधिकमध्यमसुत्यावदनुष्ठेया, षष्ठी सुत्या पौरुषमेधिकमध्यमसुत्यावत। सप्तम्यां सुत्यायां परिशुद्धानि आर्यभोजनयोग्यानि सर्वाणि ब्रीह्यादीन्यन्नान्यानीय, यथावत पक्त्वा आह्वनीये जुह्यात।

एतदतिरिच्य सवा नाम केचन एकाहविशेषाः सोमयागाः तैत्तरीयब्राह्मणे विहिता। यथा – 1.बृहस्पतिसवः 2.वैश्वसवः 3.ब्राह्मणसवः 4.सोमसवः 5.पृथिसवः 6.गोसवः 7.ओदनसवः 8.मरुस्तोमः 9.अग्निष्टुत 10.इन्द्रस्तुतः 11.अपतोर्यामः 12.विधन इति द्वादश।

**स्मार्तयज्ञः –**

स्मृतिप्रतिपादित ये यज्ञाः सन्ति ते स्मार्त्यज्ञरूपेण कथ्यते। स्मृतिप्रतिपादितयज्ञानां उल्लेखः अनेकेषु स्मृतिग्रन्थेषु प्राप्यते। विष्णुधर्मोत्तरपुराणे अस्य चर्चा प्राप्यते। विविधग्रन्थेषु नित्ययज्ञरूपेण ईदृशं विवरणं प्राप्यन्ते। यथा –

**गौतमसूत्रे यथा –**

'औपासनहोमः, वैश्वदेवम्, पार्वणन्, अष्टका, मासिकाश्राद्धम्, श्रवणा, शलगव इति सप्त पाकयज्ञसंस्थाः। अग्निहोत्रम्, दर्शपूर्णमासौ, आग्रयणम्, चातुर्मास्यानि, निरूढ़पशुबन्धः, सौत्रमणी, पिण्डपितृयज्ञादया हर्विहोमा इति सप्त हविर्यज्ञसंस्था। अग्निष्टहोमः, अत्यग्निष्टहोमः, उक्थ्यः, षोडशी, वाजपेयः, अतिरात्रः, आप्तोर्याम इति सप्त सोमसंस्थाः। [3]

श्रीमद्भागवते सात्विक, राजसिक एवं तामसिक यज्ञस्य चर्चा ईदृशी वर्तते। तद्यथा –

**सात्विक–यज्ञ :** अफलाकांक्षिभिर्यशो विधिदृष्टो य इज्यते।
यष्टव्यमेवेति मनः समाधाय स सात्विकः।।[4]

**राजसिक–यज्ञ :** अभिसन्धाय तु फलं दम्भार्थमपि चैव यत्।
इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम्।।[5]

**तामसिक–यज्ञ :** विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम्।
श्रद्धाविरहितं यज्ञं तामसं परिचक्षते।। [6]

**पञ्चमहायज्ञाः –**

पञ्च सूना गृहस्थस्य चुल्ली पेषण्युपस्करः।
कण्डनी चोदकुम्भश्च बध्यते यास्तु बाह्यन्।
तासां क्रमेण सर्वासां नित्यकृत्यर्थं महर्षिभिः।

पञ्च क्लृप्ता महायज्ञाः प्रत्यहं गृहमेधिनाम्।।
होमो दैवो बलिर्भूतं नृयज्ञोऽतिथिपूजनम्।[7]

पञ्चमहायज्ञस्च चर्चा विविधेषु ग्रन्थेषु ईदृशी प्राप्यते। यथा –

**तैत्तिरीय आरण्यक :**

'पञ्च वा एते महायज्ञाः सतति प्रतायन्ते सतति सन्तिष्ठान्ते ——— पितृयज्ञो मनुष्ययज्ञो भूतयज्ञो ब्रह्मयज्ञ इति।[8]

**शतपथ ब्राह्मण :**

भूतयज्ञो मनुष्ययज्ञः पितृयज्ञो देवयज्ञो ब्रह्मयज्ञ इति।[9]

**छान्दोग्यपरिशिष्ट :**

देवभूतपितृब्रह्ममनुष्याणामनुक्रमात्।
महासत्राणि जानीयात्त एव हि महामखाः।। [10]

**आश्वालयनगृह्यसूत्र** :

अथातः पञ्चमहायज्ञा देवयज्ञो भूतयज्ञः पितृयज्ञो ब्रह्मयज्ञो मनुष्य यज्ञ इति।[11]

**मनुस्मृति :**

अध्यापनं ब्रह्मयज्ञ, पितृयज्ञस्तु तर्पणम्।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ।।[12]

**याज्ञवल्क्यस्मृति :**

बलिकर्मस्वधाहोमस्वाध्यायातिथिसत्क्रियाः।
भूतपितृपरब्रह्म मनुष्याणां महामखाः।।[13]

ऋग्वेदे – अयं यज्ञो भुवनस्य नाभिः।[14]

शुक्लयजुर्वेदे – अयं यज्ञो भुवनस्य नाभिः।[15]

अर्थववेदे – यज्ञो विश्वस्य भुवनस्य नाभिः।[16]

वायुपुराणे – यज्ञेन देवानाप्नोति।[17]

मत्स्यपुराणे – यज्ञैश्च देवानाप्नोति।[18]

अग्निपुराणे – यज्ञैश्च देवानाप्नोति।[19]

मत्स्यपुराणे – यज्ञभागभुजो देवाः।[20]

पद्मपुराणे – यज्ञभागभुजः सर्वे।[21]

वायुपुराणे – यज्ञो वै सर्वकामधुक।[22]

पद्मपुराणे – यज्ञो यज्ञपतिः साक्षात् ।[23]

पद्मपुराणे – यज्ञाऽयं सर्वकामधुक।[24]

अथर्ववेदे – यज्ञाः पृथिवीं धारयन्ति। [25]

विधियागः, रुद्रयागः, प्रजापतियागः, देवयागः, गणेशयागः, नवग्रहयागः, गायत्रीयागः, लक्ष्मीयागः, शतचण्डीयज्ञः, सहस्रचण्डीयज्ञः, पुत्रेष्टियज्ञः इत्यादि यज्ञानां नामानि स्मृतिग्रन्थेषु प्राप्तानि भवन्ति। अत्र सर्वेषां यागानां विधिः विविधयज्ञ पद्धतिनामके ग्रन्थे प्राप्यते।

पञ्चसम्प्रदायेषु यज्ञविषयिकी धारणा समानरूपेण प्राप्यते। यज्ञलक्षणविषये, भेदविषये यज्ञानां प्राचीनता विषये च सम्प्रदायेषु मतैक्यं वर्तते तथा च यज्ञस्य आवश्यकता विषयेऽपि सर्वैः आचार्यैः स्वीक्रियते। यथा–

यज्ञदानतपः कर्म न त्याज्यं कार्यमेव तत्।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्।।[26]

तथा च –

ऋणैस्त्रिभिर्द्विजो जातो देवर्षिपितृणां प्रभो।
यज्ञाध्ययनपुत्रैस्तान्यनिस्तीर्य त्यजन् पतेत्।। [27]

यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः।।[28]

विविधेषु पुराणेषु अपि याज्ञानां विवेचनं प्राप्यते। तत्र ग्रहस्य जनानां कृते पञ्चमहायज्ञविवेचनं अपि च नैमित्तिककर्मविषयकं यज्ञमपि स्वीक्रियते। मानवकल्याणाय यज्ञास्य आवश्यकता सर्वैः स्वीक्रियते। अनेन प्रतीयते यत् कर्मकाण्डविषयकं विविधसम्प्रदायेषु एकरूपं प्राप्यते। अनेन सह षोडशसंस्कारादीनामपि विषये सर्वं सम्प्रदायेषु साम्यता दृश्यते। नैमित्तक यज्ञयागादि विषय कर्मकाण्डविषयकमपि सर्वैः समानता वर्तते।

# सन्दर्भ–सूची


1. कात्यायन श्रौतसूयम् –15/1/1,
2. आपस्तम्ब श्रौतसूत्रम् –18/1/1
3. (गौतमधर्म सूत्र– 8/18)
4. (गीता.17/11)
5. (गीता.17/12)
6. (गीता.17/13)
7. (मनु. 3/18/69)
8. आरण्यक – (2/10)
9. शतपथ ब्रा. – 11/5/5/1
10. छान्दोग्य
11. आश्वालयनगृह्यसूत्र – 3/1/1
12. (मनु.–3/72)
13. (याज्ञ. आचाराध्याय–102)
14. ऋग्वेद – 1/164/35
15. शुक्ल यजुर्वेद –– 23/62
16. अथर्ववेद– 9/10/14

17. वायुपुराण –– 57/117

18. मत्स्य. –142/33

19. अग्नि. –379/1

20. मत्स्य. –245/14

21. पद्मपुराण– पद्मपुराणे , सृष्टिखण्डे

22. वायपुराण. –– 60/7

23. पदम्पुरण उत्तरखण्ड–224/17

24. पद्मपुरण

25. अथर्ववेद

26. गीता – 18/5

27. श्रीमद् भाग.–10/84/39

28. गीता – 3/9